# "एओङ्, ऐऔच् इति माहेश्वरसूत्रसम्बद्धानां ज्ञापकानां ताताचार्यनिर्दिष्टविवृत्यनुसारम् अध्ययनम् ।"

सुमित म. कठाळे
डॉ. हरेकृष्ण अगस्ती

**सारांश:**

एओङ्[1], ऐऔच्[2] इति माहेश्वरसूत्रसम्बद्धानां ज्ञापकानाम् आचार्यनागेशभट्टेन विरचितं ज्ञापकसङ्ग्रहमाश्रित्य महद्भिः म. म. नावल्पाक्कं शठकोपरामानुजताताचार्यैः या विवृतिव्याख्या लिखिता तस्याः अत्र समीक्षात्मकम् अध्ययनं क्रियते । ज्ञापकसङ्ग्रहः इति ग्रन्थनाम्ना एव प्रतीयते यत् व्याकरणशास्त्रगतानां केषाञ्चित् विशिष्टविचाराणां ज्ञापनाय यानि स्थलानि निर्दिष्टानि तेषां स्थलानामेकत्र सङ्ग्रहः अत्र कृतः इति। तादृशानां ज्ञापकानां ज्ञापकत्वमाश्रित्य आचार्यैः महद्भिः ताताचार्यैः व्याख्या कृता । प्रथमं तावत् प्रधानतया ज्ञापकसङ्ग्रहनामके ग्रन्थे समाविष्टानां ज्ञापकस्थलानां सङ्ग्रहपूर्वकं व्याख्यानं व्यधायि ताताचार्यैः। ततः पश्चात् ज्ञापकसङ्ग्रहे अविद्यमानानामपि महाभष्ये कौमुद्यां वा लभ्यमानानां ज्ञापकानां सङ्ग्रहोऽकारि। अस्मिन् शोधपत्रे नागेशभट्टकृतज्ञापकसङ्ग्रहे विद्यमानानां एओङ्, ऐऔच् इति माहेश्वरसूत्रसम्बद्धानां ज्ञापकस्थलानां विषये ताताचार्यैः ये विचाराः प्रस्तुताः तेषां समीक्षा क्रियते। तदूर्ध्वं ज्ञापकसङ्ग्रहे अविद्यमानानामपि महाभष्ये कौमुद्यां वा लभ्यमानानाम् एओङ्, ऐऔच् इति माहेश्वरसूत्रसम्बद्धानां ज्ञापकानां विषये ताताचार्याणां विचाराणां समीक्षा क्रियते ।

**सङ्केतपदानि** - एओङ्, ऐऔच्, ज्ञापका:, माहेश्वरसूत्राणि, महर्षिपाणिनि: ।

**प्रस्तावना** - पाणिनीयव्याकरणस्य सूत्रमूले तिष्ठति माहेश्वरसूत्रजालम् । महर्षिपाणिनिना महेश्वरात् प्राप्तै: चतुर्दशशब्दै: व्याकरणसूत्राणि व्यरचि । तत्र माहेश्वरसूत्राणां बहुविधै: क्रमै: संयोजिता वर्तते । महाभाष्यकारेण महर्षिपतञ्जलिना तेषां क्रमसंयोजनानां सोदाहरणं विस्तृतं च विवरणं महाभाष्ये कृतम् । तथापि केचन अंशा: अस्फुटा: येषां ज्ञानं केनचिद् सङ्केतेन भवितुमर्हति । इमे अंशा: ज्ञापका: इति कथ्यन्ते। माहेश्वरसूत्राणां सर्वाभ्य: दिग्भ्य: अवबोध:

[1] मा.सू. – ३ ।
[2] मा. सू. -४ ।

यद्यपि महाभाष्याद् भवति तथापि साङ्केतिकानां अंशानाम् अवबोधाय ज्ञापका: अवश्यम् अध्येतव्या: भवन्ति । शोधपत्रेऽस्मिन् एओङ्, ऐऔच् इति सूत्रसम्बद्धानां ज्ञापकानां ताताचार्यनिर्दिष्टानां विवृत्यनुसारं अध्ययनम् अत्र कृतं वर्तते।

**उद्देश: :-**

महर्षिपाणिनिना विरचिते अष्टाध्यायी इति व्याकरणशास्त्रस्य नियामकग्रन्थे सूत्राणि अतिरिच्य ये साङ्केतिका: अंशा: ज्ञापकत्वेन निर्दिष्टा: तेषु मातृकारूपेण एओङ्, ऐऔच् इति सूत्रसम्बद्धानां ज्ञापकानां ताताचार्यनिर्दिष्टानां विवृत्यनुसारं अध्ययनम् अत्र चिकिर्षते।

**संशोधनपद्धति: :-**

एओङ्, ऐऔच् इति माहेश्वरसूत्रसम्बद्धानां ज्ञापकानां ताताचार्यनिर्दिष्टानां विवृत्यनुसारम् अध्ययनं कर्तुं समीक्षात्मक- संशोधनपद्धते: अवलम्ब: अत्र कृतो वर्तते।

**परिचय: :-**

आचार्यनागेशभट्टेन विरचितं ज्ञापकसङ्ग्रहमाश्रित्य महद्भि: म. म. ना. शठकोपरामानुजताताचार्यै: विवृतिव्याख्या व्यरचि। तत्र निर्दिष्टानां एओङ्, ऐऔच् इति माहेश्वरसूत्रसम्बद्धानां ज्ञापकानाम् अध्ययनम् अत्र कृतं वर्तते। नागेशभट्टेन अनिर्दिष्टानां किन्तु महाभाष्ये कौमुद्यां वा निर्दिष्टानां तत्संबद्धानां ज्ञापकानाम् अपि अध्ययनम् अत्र कृतं वर्तते।

**विवरणम्** :-

ज्ञापकसङ्ग्रहमाश्रित्य महद्भि: ताताचार्यै: रचितायां विवृतिव्याख्यायां निर्दिष्टानां एओङ्, ऐऔच् इति माहेश्वरसूत्रसम्बद्धानां ज्ञापकानाम् अध्ययनम् आदौ क्रियते।

गोनौग्रहणात् ज्ञापकात् नाव्यपवृक्तस्य अवयवस्य तद्विधिरिति। महाभाष्ये एओङ् सूत्रे इदं ज्ञापकं प्रतिपादितमिति कृत्वा, अत्र नागेशेन अस्य निवेशः कृतः। तत्र आचार्याः ताताचार्याः विवृत्यां विवृण्वन्ति अस्य विषये एवं रूपेण।

**उदाहरणम् -** एओङ् सूत्रे भाष्ये आकारादिषु श्रूयमाणाः ये अकाररूपाः अवयवाः, ऋकारे रेफसदृशः अवयवः अथवा एकारादिषु इकाररूपाः तेषां सामान्यवर्णानाम् अकारादीनां विधीयमानानि कार्याणि प्राप्नुवन्ति न वा इति सन्देहमादाय, यदि वर्णैकदेशाः वर्णग्रहणेन

गृह्येरन् तर्हि अग्ने इन्द्रम्, वायो उदकमित्यादिस्थले 'अकः सवर्णे दीर्घः'[3] इत्यनेन सूत्रेण सवर्णदीर्घः स्यात्। एवमेव अन्यत्रापि दोषाः स्युरिति कृत्वा समाधानाय इदं ज्ञापकसङ्ग्रहोक्तं वचनं प्रतिपादितम् – नाव्यपवृक्तस्यावयवस्य तद्विधिरिति। अभिन्नमिति बुद्धौ कल्पितस्य यः अवयवः तस्य, यः पृथग्भूतावयवविषयकः विधिः तस्य प्रवृत्तिर्नभवति इति अस्यार्थः। 'गोद्व्यचोऽसङ्ख्यापरिमाणाश्वादेर्यत्'[4] इत्यस्मिन् सूत्रे कृतं गोग्रहणम्, 'नौद्व्यचष्ठन्'[5] इति सूत्रस्थं नौग्रहणं च अस्यार्थस्य ज्ञापकः इति आशयः। तथा हि – प्रथमसूत्रे गोशब्दात् द्व्यच्कशब्दाच्च तस्य निमित्तं संयोग उत्पातो वा तत्र यत् भवतीत्यर्थः। यदि गोशब्दगतम् ओकारम् अ उ इति द्विधा विभज्य ग्रहणं कर्तुं शक्येत, तर्हि गोशब्दस्यापि द्व्यच्कत्वादेव यत् प्रत्यये सिद्धे गोग्रहणं व्यर्थं सत् इदं वचनं ज्ञापयति। एवमेव नौद्व्यचः इत्यादि सूत्रे द्व्यच्कस्य नौशब्दस्य च तरतीत्यर्थे ठन् प्रत्ययः विधीयमानः, तत्र नौशब्दे वर्णद्वयकल्पितः समुदायः अस्तीत्यतः तत्रापि द्व्यच्कत्वादेव ठनि सिद्धे पुनः नौग्रहणं व्यर्थं स्यात्। तद्व्यर्थं सत् वचनमिदं ज्ञापयति यत् 'नाव्यपवृक्तस्यावयवस्य तद्विधिरिति'। तेन अग्ने इन्द्रमित्यदौ सवर्णदीर्घाशङ्का वारिता। इमे अंशाः आचार्यैः विवृत्यामुल्लिखिताः।

ज्ञापकसङ्ग्रहे अविद्यमानस्य किन्तु महाभाष्ये लभ्यमानस्य एओङ्, ऐऔच् इति माहेश्वरसूत्रसम्बद्धस्य ज्ञापकस्य विषये ताताचार्याणां विचाराणां समीक्षा अधुना क्रियते।

भाष्ये एकादेशविधायकेषु सूत्रेषु दीर्घग्रहणं कर्तव्यम् आद्गुणः दीर्घः, वृद्धिरेचि दीर्घः इत्येवम्। किमस्य प्रयोजनमिति जिज्ञासायाम् -

**उदाहरणम् -** खट्वा+इन्द्रः=खट्वेन्द्रः, खट्वौदिनः इत्यादौ पूर्वपरयोः स्थाने भवन् गुणवृध्यादिः द्विमात्रः एव यथा स्यात् स्थान्यनुसारेण त्रिमात्रश्चतुर्मात्रादेशो मा भूत् इत्येवं वार्तिककारेण उक्ते सति भाष्यकारः ब्रूते – दीर्घग्रहणं न कर्तव्यम्। कुतः – योगविभागादेव इष्टसिद्धेः। उपरिष्टात् योगविभागः करिष्यते। अकः सवर्णे इत्येकः योगः। अकः सवर्णे अचि एकादेशो भवति इति तस्यार्थः। दीर्घः इत्यपरः योगः, अकः सवर्णे इति एकादेशो भवन् एकः पूर्वपरयोः इत्येवं निर्दिष्टः यः सः दीर्घः द्विमात्रो भवति इत्यर्थः इति प्रत्यपादयत्। एतदुपरि पूर्वपक्षी शङ्कते, यदि योगविभागः करिष्यते तर्हि दोषः भवति। क्व ? पशुम्, विद्धम्, पचन्ति इत्यादौ। अत्र 'अमि पूर्वः'[6] इति पूर्वरूपम् एकादेशः द्विमात्रः स्यात्। येन च पशुम्

[3] अ.सू. ६-१-१०१।
[4] अ.सू. ५-१-३९।
[5] अ.सू. ४-४-७।
[6] अ. सू. ६-१-१०७।

इत्याद्यनिष्टमापद्येत इत्याशङ्कायां समाधानमुक्तम् । अत्र अयमभिप्रायः पशुम् इत्यत्र पशु+अम् इति स्थिते पूर्वपरयोः उकार-अकारयोः स्थाने पूर्वः उकारः आदिश्यते, स च सति दीर्घग्रहणे द्विमात्रः स्यात् इति शङ्का। तत्रोच्यते, यद्यत्र द्विमात्रः आदेशः स्यात् तदा अमि पूर्वः इति सूत्रे 'एकः पूर्वपरयोः'[7] इति सूत्रेण पूर्वग्रहणमनुवर्तते। सूत्रं तु अमि इत्येव भवतु। अमि इति इयता भागेन एव इष्टसिद्धेः पुनः सूत्रे यद् पूर्वग्रहणं करोति तद् व्यर्थं, तद् व्यर्थीभूय ज्ञापयति-यत् , यथाजातीयकं पूर्वः तथाजातीयकः एव उभयोः स्थाने भवतीति। तन्नाम पूर्वस्य वर्णस्य यज्जातीयकं रूपं तज्जातीयकमेव उभयोः स्थाने आदिष्टं भवतीत्यर्थः। तथा च पशुमित्यत्र एकादेशः पूर्वजातीयः एकमात्रिकः (ह्रस्वः)एव भवतीति समाधानम् । तथा विद्धम् इत्यत्र व्यध् धातोः क्तप्रत्यये सम्प्रसारणे वि अध् त् इति स्थिते 'सम्प्रसारणाच्च'[8] इति पूर्वरूपं भवत् पूर्वरूपं द्विमात्रं स्यादिति शङ्का, अतस्तत्र समाधत्ते, आचार्यप्रवृत्तिरेव ज्ञापयति न अनेन सम्प्रसारणदीर्घः भवतीति। यदयं हलः इति उत्तरस्य सम्प्रसारणस्य दीर्घत्वं शास्ति।एकादेशे दीर्घग्रहणम् इत्यनेनैव यदि दीर्घः सर्वत्र इष्येत तर्हि 'हलः'[9] इति सूत्रम् आचार्यः न कुर्यात्। हलः इति सूत्रेण अङ्कावयवाद्धलः परस्य यत्सम्प्रसारणं तदन्तस्य दीर्घः इत्युच्यते। यदि इदानीं सः दीर्घः एकादेशे दीर्घग्रहणम् इति वार्तिकेन एव सिद्धः स्यात् तर्हि तत्सूत्रं व्यर्थं स्यात्, तद् व्यर्थीभूय ज्ञापयति यत्- सम्प्रसारणाच्च इति सूत्रेण पूर्वरूपं भवत् दीर्घात्मकं न इति। तस्मात् न दोषः इति समाहितम् । तथा डुपचष् पाके इति धातोः झिप्रत्यये अन्तादेशे पच्+अन्ति इति स्थिते 'अतो गुणे'[10] इति जायमानं पररूपं दीर्घात्मकं स्यात् येन च पचान्ति इत्यनिष्टमापद्येत इति शङ्कायामुच्यते, अतो गुणे इति सूत्रे 'एङि पररूपम्'[11] इत्यतः पररूपमित्यनुवर्तते तेन पररूपमेकादेशः भवतीति ज्ञायते। एङि पररूपमिति सूत्रे रूपग्रहणं मास्तु , एङि परः इत्येव भवतु, ततः अतो गुणे इति सूत्रे अपि परम् इत्येव अनुवर्तताम् । तदा परः यः वर्णः सः आदिष्टो भवति इति इयतां सिद्धे रूपग्रहणं यद् करोति तद् व्यर्थम्। तद् व्यर्थीभूय ज्ञापयति यत् परस्य यथाजातीयकं रूपं तथाजातीयकमुभयोः स्थाने भवतीति विवृत्तिकाराणाम् अभिप्रायः ।

ज्ञापकसङ्ग्रहे महाभाष्ये वा अविद्यमानस्य किन्तु वैयाकरणसिद्धान्तकौमुद्यां लभ्यमानस्य एओङ्, ऐऔच् इति माहेश्वरसूत्रसम्बद्धस्य ज्ञापकस्य विषये ताताचार्यैः ये विचाराः समुपस्थापिताः तेषां समीक्षा इतः परं क्रियते ।

---

[7] अ. सू. ६-१-८४ ।

[8] अ. सू. ६-१-१०८ ।

[9] अ. सू. ६-४-३ ।

[10] अ. सू. ६-१-९७ ।

[11] अ. सू. ६-१-९४ ।

'औतोऽम्शसो:'[12] इति पाणिनीयं सूत्रम् । तेन च सूत्रेण ओकारात् अम्शसो: अचि परे आकार एकदेश: स्यादिति अर्थ: उच्यते ।

**उदाहरणम्** –

ग्लौ इति शब्दात् अम् प्रत्यये परत: ग्लौ अम् इति स्थिते अनेन सूत्रेण औकार-आकारयो: स्थाने आकार एकादेश: प्राप्नोति इति उच्यते । ननु अस्मिन् सूत्रे स्थानित्वेन उद्दिष्ट: वर्तते ओकार: । ग्लौशब्दे च औकार: वर्तते इत्यत: स्थानिन: भेदात् कथम् आकारादेश: स्याद् इति चेत् 'औदोतो: कण्ठोष्ठम्' इति ओकारौकारयो: वर्णोच्चारणस्थानत्वेन कण्ठोष्ठस्य निर्देश: कृत:। अत: स्थानसाम्यात् ओकारेण औकारस्य ग्रहणम् एवं औकारेण ओकारस्यापि ग्रहणं भवति इत्यत: प्रकृते औकारे अपि ओकारप्रयुक्तकार्यं स्यात् इति कृत्वा अत्र आकारादेश: प्राप्नोति । अत: ज्ञापनेन प्रकृते तयो: सावर्ण्यभावं निरूपयति ग्रन्थकार:। तथा हि 'ऐऔच्' इति पृथक् सूत्रकरणात् ज्ञापकात् प्रकृते ओकरौकारयो: सावर्ण्यभाव: ज्ञाप्यते इति।यत: यदि एकार-ऐकारयो: तथा ओकार-औकारयो: परस्परं सावर्ण्यं भवति तर्हि 'ऐऔच्' इति पृथक् सूत्रमेव न कर्तव्यम्। तावता तयो: ग्रहणं भवति इति कृत्वा। प्रकृते आरम्भबलात् एदैतो: ओदौतोश्च सावर्ण्यं नास्ति इति ज्ञायते। तथा च तयो: सावर्ण्यभाव: ज्ञापित: इति कृत्वा ग्लौशब्दात् अमि प्रत्यये पुन: 'औतोऽम्शसो:' इति सूत्रेण न भवति आकारादेश: इति ग्रन्थकाराणामाशय: ।

**निष्कर्ष: :-**

अष्टाध्याय्यां सूत्रै: ये अंशा: प्रतिपादयितुं न शक्यन्ते ते विषया: अस्फूटतया सूत्रस्थेन लिङ्गेन ज्ञापकरूपेण उपस्थापिता: महर्षिपाणिनिना। तेषाम् अध्ययनं विना समग्रं शास्त्राध्ययनं नैव भवितुमर्हति। अत: ज्ञापकानाम् अध्ययनम् अत्यन्तं महत्त्वपूर्णं भवति । एओङ्, ऐऔच् इति माहेश्वरसूत्रे यथा पाणिनीयसूत्राणां कृते उपकारके तथा तदतिरिच्य अन्यानपि साङ्केतिकान् अंशान् ज्ञापयत: । महद्भि: ताताचार्यै: तेषां सोदाहरणं विवरणं कृतम् । शोधपत्रेऽस्मिन् तेषामेव समीक्षणं कृतं वर्तते । एतेन ज्ञायते यद् माहेश्वरसूत्राणि पाणिनीयसूत्राणि वा न् केवलम् एकया दिशा अध्येतव्यानि अपि तु बाहुभि: अङ्गै: अध्येतव्यानि भवन्ति । तेनैव समग्रमपि शास्त्राध्ययनं भवितुमर्हति। ताताचार्याणां भाषा अतीव सरला, सुगमा च भवति येन तै: यद् प्रतिपादयितुम् इष्टं तद् अध्येतृभ्य: अवश्यमेव अवगम्यते ।तै: ज्ञापकानां ललितविवरणपूर्वकं यद् विवृतिव्याख्यानं कृतं तत्र सूत्राणां पाणिनीयक्रम: एव अनुसृत:,

[12] अ.सू. ६-१-९३ ।

उदाहरणानि अपि वैयाकरणसिद्धान्तकौमुदीगतान्येव स्वीकृतानि येन ततद्विषयस्य अवबोधो भवतीति ताताचार्याणां वैशिष्ट्यम्।

**सन्दर्भ:** - १. मा. सू. – माहेश्वरसूत्रम्

२. अ. सू. - अष्टाध्यायी-सूत्रपाठ:

**सन्दर्ग्रन्थसूची :-**

| | | |
|---|---|---|
| १. | ज्ञापकसङ्ग्रह: (म.म.श्रीरामानुजताताचार्यविवृतिसमेत:) | नागेशभट्ट: सम्पादक: - म.म.श्रीरामानुजताताचार्य:, २००२ केन्द्रिय-संस्कृत-विश्वविद्यालय:, तिरुपति: |
| २. | परिभाषेन्दुशेखर: (मराठीभाषान्तरसहित:) | नागेशभट्ट: भाषांतरकर्ता – रा. ब. वाडेगावकर, नागपूर |
| ३. | परिभाषेन्दुशेखर: ('सुबोधिनी' हिंदी व्याख्ययोपेत:) | नागेशभट्ट: व्याख्याकार: - आचार्य: विश्वनाथमिश्र: चौखंबा सुरभारती प्रकाशन, वाराणसी |
| ४. | व्याकरणमहाभाष्यम् ('ज्योत्स्ना' समुद्भाषितम्) | महर्षि: पतञ्जलि:, डॉ. हरीनिरायण: तिवारी चौखंबा सुरभारती प्रकाशन, वाराणसी |
| ५. | वैयाकरणसिद्धान्तकौमुदी (बालमनोरमासहिता दीपिकाख्यव्याख्ययोपेता च) | भट्टोजिदीक्षित:, गोपालदत्त-पाण्डेय:, चौखंबा सुरभारती प्रकाशन, वाराणसी |
| ६. | संस्कृत व्याकरणशास्त्र का इतिहास | युधिष्ठिर: मीमांसक: श्यामलाल कपूर ट्रस्ट, सनिपात, हरियाणा |